सङ्कलनात्मकमूल्याङ्कनम्-२ समय:- होरात्रयम्

कक्षा-दशमी (२०१२-२०१३) अङ्का:-९०

# संस्कृतम्

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।

(क)खण्ड:- अपठित-अवबोधनम् ( अङ्का:-१० )

(ख)खण्ड:- रचनात्मकं कार्यम् ( अङ्का:-१५ )

(ग)खण्ड:-अनुप्रयुक्तव्याकरणम् ( अङ्का:-३० )

(घ)खण्ड:-पठित-अवबोधनम् (अङ्का:-३५ )

## (क)खण्ड:-अपठित-अवबोधनम् (अङ्का:-१० )

अधोलिखितम् अनुच्छॆदं पठित्वा प्रश्नान् उत्तरत ।

तुलसी केन वा न ज्ञायेत ? भारते प्रतिगृहं सा भवेत् एव । प्रतिदिनं सा पूज्यते भक्त्या । केषुचित् विशिष्टेषु प्रसङ्गेषु तस्या: विशेषपूजा अपि । बहूनां रोगाणाम् इव परिसरमालिन्यस्य निवारणेऽपि सा उपकरोति इति वदन्ति वैज्ञानिका: । तस्या: एतत् वैशिष्ट्यम् एव एषु दिनेषु ताजभवनस्य संरक्षकाणाम् अवधानम् अपि आकृष्टवत् अस्ति । परिसरमालिन्यकारणत: ताजभवनस्य सौन्दर्यं यत् विनश्यत् अस्ति तस्य निवारणाय तद्भवनसंरक्षकै: चिन्तितं यत् तुलस्या: साहाय्यं स्वीकरणीयम् इति ।अत: इदानीं ताजभवनपरिसरे सहस्रश: तुलसीसस्यानि आरोप्यमाणानि सन्ति । तुलसी आधिक्येन आम्लजनकम् उत्पाद्य हानिकराणाम् अनिलानां प्रभावं न्यूनीकरोति इति तु प्रमाणसिद्धं सत्यम् ।

१.एकपदेन उत्तरत । २

(क) भारते प्रतिगृहं का भवेत् ?

(ख) तुलसी आधिक्येन किम् उत्पादयति ?

२. पूर्णवाक्येन उत्तरत । २

(क) केन कारणेन ताजभवनस्य सौन्दर्यं विनश्यत् अस्ति ?

(ख) तुलसी किमर्थम् उपकरोति इति वदन्ति वैज्ञानिका: ?

३. यथानिर्देशम् उत्तरत । ४

(क) गृहं गृहं प्रति- इत्यस्य समस्तपदं किम् ?

( प्रतिदिनम्, प्रतिगृहम्, वैशिष्ट्यम्, प्रतिगृहे )

(ख) प्रतिदिनं सा पूज्यते भक्त्या- अत्र (सा) इति पदं कस्यै प्रयुक्तम् ?

( तुलस्यै, ताजभवनाय, रोगाय, भक्त्यै )

ग) विशिष्टेषु प्रसङ्गेषु- अत्र विशेषणपदं किम् ? ( गृहेषु, प्रसङ्गेषु, विशिष्टेषु,मार्गेषु )

(घ)) विनश्यत्- इति पदे क: प्रत्यय: प्रयुक्त: ? ( क्त, शतृ, शानच्, यत् )

४. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत । २

## (ख)खण्ड:-रचनात्मकं कार्यम् (अङ्का:-१५ )

१.भवत्या: नाम नीता। भवती जनकपुर्यां वसति। भवत्या: सखी अपर्णा संस्कृतं पठितुं भवत्या: परामर्शं इच्छति। सा जम्मूनगरे वसति। तां प्रेरयितुं लिखितम् इदं पत्रं पूरयित्वा पुन: उत्तरपुस्तिकायां लिखत।५

११५-बी,(१)----------------------

नई दिल्ली-११००५८

दिनाङ्क:-----------------------

प्रिये(२)----------------------------------- ,

नमस्ते ।

भवत्या: पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति(३)------------------पठित्वा मे प्रसन्न्नताया: सीमा नास्ति। एषा भाषा सर्वाधिका(४)--------------------। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा। वेदा:, उपनिषद:, रामायणम्, महाभारतं,(५)--------------------------,महाकाव्यानि, कथासाहित्यम् इत्यादिकं सर्वं(६)------------------अत्यन्तं मार्गदर्शकं,ज्ञानवर्धकं, प्रेरणाप्रदं च अस्ति। (७)------------------संस्कृतं पृथक् कर्तुं तथैव न शक्यते यथा पुष्पेभ्य: सुगन्धम्। संस्कृतेन सम्भाषणम् अस्माकं हृदयेषु गौरवं वर्धयति, हीनभावनां च नाशयति। अत: त्वम् अवश्यं संस्कृतं पठ, पठित्वा च(८)-------------------कुरु। एवं वयं भारतमातु: सेवां कृत्वा धन्या: भवाम।

सर्वेभ्य: अग्रजेभ्य: मम प्रणामा:,अनुजेभ्य: च आशीर्वादा: ।

भवत्या: प्रियसखी

(९)--------------------

सेवायाम्

| |
|---|
| कु. अपर्णा |
| ३५, गान्धिनगरम् |
| (१०)--------------१८०००४ |

मञ्जूषा

| |
|---|
| वैज्ञानिकी, प्रचारम्, जनकपुरीत:, वाङ्मयम्, नीता, भारतीयसंस्कृते:, अपर्णे, जम्मू, इति, पुराणानि |

२.अधोदत्त्तं चित्रं दृष्ट्वा मञ्जूषाया: शब्दानां साहाय्येन संस्कृते पञ्च वाक्यानि लिखत । १०



मञ्जूषा

| |
|---|
| गोपुरस्य,स्तम्भा:,कुमुदानि,वृक्षा:,जलं,स्वच्छम्,उन्नता:,आकाश:,नीलवर्ण:,प्रतिबिम्बं,तडाग:,अस्ति,सन्ति दृश्यते,दृश्यन्ते, तुङ्गम्, सुन्दराणि, शीतलम् |

अथवा

“ग्राम्यजीवनम्”-इति विषये संस्कृते पञ्च वाक्यानि लिखत ।

| |
|---|
| ग्रामीणा:,कृषका:,सन्ति,कर्षन्ति,रोपयन्ति,धान्यानि, शाकादीनि,क्षेत्राणि,बीजानि,वपन्ति,परिश्रमशीला: |

## (ग)खण्ड:-अनुप्रयुक्तव्याकरणम् (अङ्का:-३०)

१.सन्धिं/ विच्छेदं वा कुरुत । ५

(क) कन्याकुमारी (पौ+अनं) तीर्थस्थानम् अस्ति।

(ख) तत्र (सर्वेऽपि) जना: गन्तुम् इच्छन्ति ।

(ग) तत्र (अन्यत्+अपि) दर्शनीयं स्थानं विवेकानन्दस्मारकम् अस्ति।

(घ) संस्कृतस्य (वाक्+मयं ) अनुपमं वर्तते ।

(ङ) राजहंस: (सरस्तीरे ) विहरति स्म ।

२. समस्तपदं/ विग्रहवाक्यं वा लिखत । ६

(क) को भेद: (पिककाकयो: ) ?

(पिकं च काकं च तयो:, पिकस्य च काकयो:, पिकस्य च काकस्य च, पिके च काके च )

(ख) बक: (स्थिता प्रज्ञा यस्य स: ) भवति।

(स्थिरप्रज्ञ:, स्थितप्रज्ञ:, स्थितप्रज्ञा,स्थितप्रज्ञम् )

(ग) युधिष्ठिर: (साश्चर्यम् )पृच्छति।

( आश्चर्येण सह, आश्चर्यं प्रति, आश्चर्यस्य समीपम्, आश्चर्येण सा )

(घ) प्रच्छन्नभाग्य: न (यथाकालम्) आगत: ।

(कालं यथा, कालम् अतीत्य, कालम् अनतिक्रम्य, कालं परित्यज्य)

(ङ) धर्मव्याधस्य (माता च पिता च ) वृद्धौ आस्ताम्।

(मातरौ, मातापितरौ, भ्रातरौ, मातापिते )

(च) (पीताम्बर:) सर्वेषां मनांसि हरति।

( पीत अम्बर यस्य स:, पीतम् अम्बरं यस्या: सा, पीतम् अम्बरं यस्य स:,पीतम् अम्बरेण य: स: )

३.प्रकृतिप्रत्ययौ संयोज्य/ विभज्य वा लिखत । ५

(क) प्रच्छन्नभाग्य: मार्गे (क्रीडत:) बालकान् अपश्यत्।

(ख) गुरुं (सेव् +शानच् ) छात्रा: अनुग्रहं लभन्ते ।

(ग) जन्मभूमे: (महत्त्वं) सर्वे जानन्ति एव ।

(घ) जलस्य (शीतल+ तल् ) तापं दूरीकरोति ।

(ङ) एषा (कुमारी ) सुशीला अस्ति ।

४. मञ्जूषात: अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत । ५

(बहि:, श्व:, यदा-कदा, सम्प्रति, ह्य: )

अहं---------------------मन्दिरं गच्छामि। मन्दिरात्--------------------एक: चम्पकवृक्ष: अस्ति। ------------ तस्मिन् वृक्षे अनेकानि कुसुमानि आसन्। -----------------------कुसुमानां सङ्ख्या विरला जाता। --------- किमपि कुसुमं न भविष्यति इति मे चिन्ता।

५.उचितसङ्ख्यावाचिपदै: रिक्तस्थानानि पूरयत । ४

(क) दशम्यां कक्षायां (४०)--------------------------छात्रा: सन्ति।

(चतुर्दश, चत्वारिदश, चत्वारिंशत्, दशचत्वार:)

(ख) तेषु (२५)----------------------छात्रा: हिन्दीं पठन्ति।

( विंशपञ्च, पञ्चविंशति:, द्विपञ्च,पञ्चद्वौ )

(ग) अन्ये (१५)-----------------छात्रा: संस्कृतस्य छात्रा: ।

(पञ्चदश, पञ्चाशत्, दशपञ्च, पञ्चैकम्)

(घ) एतेषु (३)--------------------बालिका: श्रेष्ठा: भवन्ति।

( त्रय:, तिस्र:, त्रीणि, त्रीन्)

६.अधोलिखितवाक्येषु अशुद्धिसंशोधनं कृत्वा पुन: लिखत । ५

(क) वयं सर्वे केन्द्रीयविद्यालये (पठन्ति )।

(पठथ, पठाम:, पठाव:, पठत: )

(ख) अत्र (सर्वेषु) कक्षासु पञ्चाशदधिका: छात्रा: सन्ति।

(सर्वासु, सर्वस्मिन्, सर्वे, सर्वाणाम्)

(ग) विनम्रा: छात्रा: सदा (शिक्षकेभ्य: ) नमन्ति ।

( शिक्षकाय, शिक्षकात्, शिक्षकान्, शिक्षकै:)

(घ) शिक्षका: तु (छात्रान्) स्निह्यन्ति। ( छात्रेभ्य:, छात्रेषु, छात्राणाम्, छात्रस्य)

(ङ) अस्माकं प्रधानाचार्या अतीव (कर्तव्यपरायण:) अस्ति।

( कर्तव्यपरायणा, कर्तव्यपरायणम्, कर्तव्यनिष्ठ:,कर्मकर:)

## (घ)खण्ड:-पठित-अवबोधनम् (अङ्का:-३५)

१. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

कालोऽहम्। अहं खलु काल:। विश्वस्य आत्मा अहम्। कलयामि गणयामि जगत: आयु:प्रमाणम्। सततं चक्रवत् परिवर्तमान: भूतं वर्तमानं भविष्यदपि च वीक्षमाण: अहमेव साक्षी जगत: उत्पत्ते: विकासस्य प्रलयस्य च। इदं जगत् तु पुन: पुन: जायते विलीयते च। परमहं सर्वदा विद्यमान: अस्य सर्वं क्रियाकलापं पश्यामि।

(क) एकपदेन उत्तरत । २

१.अस्मिन् गद्यांशे वक्ता क:?

२.काल: कस्य आत्मा भवति?

(ख) पूर्णवाक्येन उत्तरत। १

काल: केषां साक्षी अस्ति ?

(ग) यथानिर्देशम् उत्तरत। २

१. “निरन्तरम्”-इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम्? (खलु, सततम्, पुन:, साक्षी )

२. “विश्वस्य आत्मा अहम्”-अत्र अहं शब्द: कस्मै प्रयुक्तम्?

(विश्वाय, आत्मने, कालाय, चक्राय)

२. पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी: ॥

(क) एकपदेन उत्तरत। २

१. विमूढधी: कीदृशं फलं परित्यजति?

२. बुद्धिमान् कीदृशीं वाचं वदेत्?

(ख) पूर्णवाक्येन उत्तरत। १

मूर्खः कीदृशीं वाचं अभ्युदीरयेत् ?

(ग) यथानिर्देशम् उत्त्तरत । २

१. " त्यक्त्वा"-इति पदस्य समानार्थकपदं चित्वा लिखत ।( वाचम्, धर्मप्रदाम्, परित्यज्य, परुषाम् )

२. "फलं पक्वम्"-अनयोः विशेषणपदं किम्? ( फलम्, पक्वम्, अपक्वम्, परित्यज्य )

३. नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

बकः-(प्रविश्य, स्वपक्षौ अवधूय) कथं मामपि अधिक्षिपसि? किं ते महत्त्वम्? वर्षर्तौ मानसं पलायसे। अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि। कीदृशी तव मैत्री? आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि। वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यनमग्नः "स्थितप्रज्ञ" इव तिष्ठामि। दुग्धधवला मे पक्षाः। न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूरं "राष्ट्रपक्षी" मन्यन्ते। अहमेव योग्यः-----

(क) एकपदेन उत्तरत २

१. कः वर्षर्तौ मानसं पलायते?

२. अमित्रम् (हंसः) आपत्काले कानि त्यजति?

(ख) पूर्णवाक्येन उत्तरत । १

जनाः कीदृशं मयूरं "राष्ट्रपक्षी" इति मन्यन्ते?

(ग) यथानिर्देशम् उत्तरत । २

१. "सर्पभक्षकम्"-इत्यर्थे अत्र कः शब्दः प्रयुक्तः?

(बहुकालपर्यन्तम्, अविचलः, अहिभुजम्, दुग्धधवलाः )

२. "अहमेव योग्यः----------अत्र "अहम्"-शब्दः कस्मै प्रयुक्तम्?

( बकाय, मयूराय,हंसाय, काकाय )

४. भावार्थे रिक्तस्थानानि पूरयत । ४

(क) परमापद्गतेनापि नैव तात त्वया रणे।

इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥

अस्य अयं भाव:-हे वत्स! अत्यन्त-आपत्तिसमये अपि त्वया(१)---------------इदम् अस्त्रं विशेषत:(२)-------न एव प्रयोक्तव्यम् ।

(ख) य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्य: कदापि च ॥

अस्य अयं भाव:- य: आत्मन: श्रेय: अनेकानि(१)---------------च इच्छति, स: परेभ्य: (२)---------------कर्म कदापि न कुर्यात् ।

| मानवेषु, सुखानि, युद्धे, अहितकरम् |
| --- |

५. अन्वये रिक्तस्थानानि पूरयित्वा पुन: लिखत। ४

य: सप्तराज्येषु विभासमान:, तरङ्गिणी यत्र च लोहिताख्या ।

'ईटा' हि यस्यास्ति पुरी प्रधाना, सुस्वागतं भो! अरुणाचलेऽस्मिन् ॥

अन्वय:- य: सप्तराज्येषु(१)--------------------, यत्र लोहिताख्या (२)----------------------च, यस्य प्रधाना पुरी (३)-----------------------हि, अस्मिन् (४)---------------------सुस्वागतम् भो!

६. प्रश्ननिर्माणं कुरुत । ४

(क) ब्रह्मण: आयु: (शतं) वर्षाणि ।

(ख) ("ओरिया" इति ) पर्वणि अरुणाचले कृषिभूमिपूजनं सामाजिककार्यं भवति।

(ग) (साधूनां) चित्ते वाचि च सरलता भवति ।

(घ) धैर्यम् (आपदां) तरणि: ।

७. घटनाक्रमानुसारेण वाक्यानि पुन: लिखत । ४

(क) दुष्टबुद्धि: मित्रस्य धनागमवृत्तान्तं अशृणोत्।

(ख) प्रच्छन्नभाग्य: दुष्टबुद्धि: च मित्रे आस्ताम्।

(ग) विषधर: तमेव दुष्टबुद्धिम् अदशत् ।

(घ) तौ चौर्यं कर्तुं ग्रामान्तरं प्रस्थितौ आस्ताम्।

(ङ) दुष्टबुद्धि: मित्रं मारयितुं कलशं गृहाभ्यन्तरे क्षिप्तवान्।

(च) बालकस्य वच: श्रुत्वा प्रच्छन्नभाग्यस्य चक्षुषी समुन्मीलिते।

(छ) स प्रयत्नं कृत्वा प्रभूतं धनम् अर्जितवान्।

(ज) गृहम् आगतं प्रच्छन्न्भाग्यं तस्य पत्नी आश्वासवचनानि उक्तवती।

८. प्रसङ्गानुसारेण उचितम् अर्थं चित्वा लिखत । ४

(क) (अश्वत्थतरुमूले) सुवर्णपूरित: कलश: विद्यते।

( पिप्पलवृक्षस्य मूले, अश्वे स्थित:, आगामिदिवसे, भवनस्य अध: )

(ख) आपदां (तरणि:) धैर्यम्।

(तरणतालम्, सन्तानम्, तुल्यता, नौका)

(ग) मम (केकारवं) श्रुत्वा कोकिल: अपि लज्जते ।

( काकस्य शब्दम्, मयूरस्य ध्वनिम्, कुक्कुटस्य शब्दम्, बकस्य ध्वनिम् )

(घ) (द्रौणिना) मे पुत्रा: भ्रातरश्च हता: ।

( द्रोणाचार्येण, द्रोणशिष्येण, द्रोणपुत्रेण, विद्रोहिणा )